वर्षम्-२४ अङ्कः-३
जनवरी तः मार्च २०२६ पर्यन्तम्
(पौष-शुक्ल-त्रयोदशी-तः चैत्र-शुक्ल-दशमी पर्यन्तम्)
(वैक्रमाब्दः-२०८२-८३)

RNI No.
DELSAN/2002/8921
ISSN : 2278-8360

संस्कृत-मञ्जरी

विद्वत्-समीक्षित एवं सन्दर्भित त्रैमासिकी शोध पत्रिका

A Peer-Reviewed & Refereed Quarterly Research Journal

दिल्ली संस्कृत अकादमी
दिल्ली-सर्वकारः

सम्पादकः
शैलेन्द्रकुमारसिंहः
सचिवः

अन्ताराष्ट्रिया त्रैमासिकी शोध-पत्रिका

आई0एस0एस0एन0-2278-8360



संस्कृत-मञ्जरी

वर्षम्-२४ अ±:-३/२०२६

(जनवरी-त: मार्च: २०२६ पर्यन्तम्)

(पौष-शुक्ल-त्रयोदशी-त: चैत्र-शुक्ल-दशमी-पर्यन्तम्)

(वैक्रमाब्द: - २०८२-८३)

प्रधान-संरक्षक: अध्यक्षÁ
माननीय: श्री कपिल मिश्रा
मन्त्री, कला-संस्कृति-भाषा-विभाग:
दिल्लीसर्वकार:

प्रधान-सम्पादक:
श्री के.महेश:
सचिव:
कला-संस्कृति-भाषा-विभाग:
दिल्ली-सर्वकार:

सम्पादक:
शैलेन्द्रकुमारसिंह:
सचिव:
दिल्ली-संस्कृत-अकादमी,
दिल्ली-सर्वकार:

सहायक-सम्पादक:
प्रद्युम्नचन्द्र:

परामर्शका:

१. **प्रो० के.बी.सुब्बारायडु, पूर्वकुलपति:**
केन्द्रीय-विश्वविद्यालय:(राष्ट्रिय-संस्कृत-संस्थानम्),नवदेहली

२. **प्रो० देवीप्रसादत्रिपाठी, पूर्वकुलपति:**
उत्तराखण्ड-संस्कृत-विश्वविद्यालय:, हरिद्वारम्, उत्तराखण्ड:

३. **प्रो० रमेशभारद्वाज:, *कुलपति:***
महर्षिवाल्मीकिसंस्कृतविश्वविद्यालय:, मुंदड़ी, कैथल:,
हरियाणाप्रदेश:

४. **प्रो० शिवश±रमिश्र:, *अध्यक्ष:***
कुलगुरु:, महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालय:,
उज्जैनम्, मध्यप्रदेश:

५. **प्रो० रणजित् बेहेरा, आचार्य:**
कला-संकाय:, संस्कृत-विभाग:, दिल्ली-विश्वविद्यालय:, देहली

६. **डॉ. *धनञ्जयमणित्रिपाठी, सहायक-आचार्य:***
संस्कृत-विभाग:, जामिया मिल्लिया केन्द्रीय-विश्वविद्यालय:,
नवदेहली

सम्पर्क:
सचिव:
दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकार:
प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-११०००५
दूरभाष: - ०११-२०९२०३६३
अणुस±ेत: - sanskritpatrika.dsa@gmail.com
वेब साईट - https://sanskritacademy.delhi.gov.in

ग्राहकताया: कृते
प्रत्य± मूल्यम्- पञ्चविंशति: रूप्यकाणि
वार्षिकशुल्कम् - शतं रूप्यकाणि

अनुक्रमणिका

संस्कृतभागः-	पृष्ठसंख्या
सम्पादकीयम्	III
१. *योगदर्शने समाधिविमर्शः* –डॉ. सुधाकरमिश्रः	१
२. *वर्तमानसन्दर्भे पाणिनिशिक्षायाः प्रासंगिकता* –डॉ. प्रकाशचन्द्रः जांगी	६
३. **जैनसंस्कृतौ नार्याः महत्त्वम्** –डॉ. कुलदीपकुमारः	१२
४. **प्रियमानसचलच्चित्रेऽभिनयस्य नाट्यशास्त्रीयो विमर्शः** –प्राची शर्मा	१७
५. **श्रेष्ठसौन्दर्य-शिल्पी कालिदासः** –डॉ. कैलाशनाथः द्विवेदी	२४
हिन्दीभागः-	
६. **वेद पर्यावरण विमर्श** –डॉ. भेषराज शर्मा	२८
७. *योगदर्शन में यम : समकालीन संदर्भ और प्रासंगिकता* – डॉ. देशराज	३४
८. *असमिया संस्कृति में संस्कृत भाषा का योगदान* –डॉ. कामिनी तनेजा	४१
९. *गीता में अध्यात्मविज्ञान* – ज्योत्स्ना	५२
अंग्रेजीभागः-	
१०. **ANCIENT INDIAN LEXICOGRAPHY : AN OBSERVATION** Dr. Varda Vasa	५८

सम्पादकीयम्

अयि सुरभारतीसमुपासकाः सुहृदयाः देववाणीवीणानिनादनिश्णाताश्च!

भारतवर्षे भाषाणां संस्कृतिनां रीतिरिवाजानां वैविध्यता वर्तते सति इयं संस्कृतभाषा भारतस्य अखण्डतायाः एकतायाश्च कृते सन्देशदात्री भाषा अस्ति। भवतां भवतीनां च सुविदितमस्ति यत् भारतीयसंविधानस्य अष्टम-अनुसूच्यानुसारं काश्मीरतः कन्याकुमारी-पर्यन्तं तथा गुजरातप्रदेशतः नागालैण्डपर्यन्तं द्वाविंशतिभाषाः सूचिबद्धाः सन्ति। अनुमीयते यत् भारते त्रयोदशतमाधिकाः भाषाः उपभाषाः च भाष्यन्ते। २०११तमस्य ईशवीयवर्षस्य जनगणनानुसारमेतेषु भाषासु शताधिकेकविंशतितमाः (१२१) भाषाः प्रमुखाः तथा च अशीत्याधिकसप्तशततमाः (७८०) उपभाषाश्च सन्ति।

भारतं भाषावैविध्यस्य प्रमुखं केन्द्रम् अस्ति, यत्र विश्वस्य भाषाणां प्रायः एक-तृतीयभागः भाष्यते। एतेषां सर्वेषां भाषाणां, बोलीनां च जननी संस्कृतम् अस्ति। भारतं एकत्र-बन्धनस्य सामर्थ्यं केवलं संस्कृतमेव वर्तते तथा च तथैव दृष्यते अपि। विश्वस्य बहवः संस्कृतयः भाषाश्च विलुप्ताः जाताः। केवलं भारतभारती भारतीयसंस्कृतिश्च स्ववैभवं सह विराजमाना वर्तते।

विश्वपटले वैविध्यतायुक्ता भारतीयसंस्कृतिः संस्कृतभाषायाः वैज्ञानिकताकारणात् एव स्वपूर्णगौरवं सह विराजमाना वर्तते। कारणमेकमेव संस्कृतभाषायाम् निहिता राष्ट्रीयचेतना। सुरभारतीप्रसाराय प्रतिबद्धा दिल्लीसंस्कृताकादमी संस्कृतमञ्जरी पत्रिकायाः चतुर्विंशतितमस्य वर्षस्य तृतीयः अंकः भवतां भवतीनाञ्च करकमलयोः समर्पयति। प्रकाशिताः लेखाः विद्यार्थीनां शोधच्छात्रणां जिज्ञासू-पाठकानां प्रौढानां विदुशां कृते अतीव उपयोगिनो भवन्ति तथा च एतैः शोधलेखैः शोधकार्य्ये सन्नद्धानां शोधच्छात्राणां मार्गदर्शनं भविष्यतिती नास्ति कोऽपि संदेहः।

आशासे पत्रिकेयम् सर्वैः पाठकैः सादरं स्वीकरिष्यते सोत्साहं च पठिष्यत इति।

शकाब्दः १९४७-४८(फाल्गुन-शुक्ल-पूर्णिमा)
(सफलाएकादशी)

निवेदकः
(शैलेन्द्रकुमारसिंहः)
सचिवः

योगदर्शने समाधिविमर्शः

-डॉ. सुधाकरमिश्रः

दृश्यते अनेन इति दर्शनम्। दृश् धातोः करणे ल्युट् सति सिद्ध्यति दर्शनशब्दः। परम्परासिद्धमिदं यत् भारतीयं दर्शनं द्विधा विभक्तम्। आस्तिकं नास्तिकञ्च। तत्र आस्तिकं षड्विधम्।

सांख्यो योगश्च मीमांसा न्यायो वैशेषिकस्तथा।
वेदान्त इति शास्त्राणि कथितानि मुनिरीश्वरैः ॥ (भारतीयदर्शन भूमिका)

नास्तिकानि च त्रिविधानि-चार्वाकजैनबौद्धादीनि।

परवर्तिकालेऽपि परवर्तिनः आचार्याः इतोऽपि भेदानां परिकल्पनां कृतवन्तः यथा-शैवदर्शनम्, शाक्तदर्शनम्, (कौलदर्शनम्) वैष्णवदर्शनम्। गीतादर्शनम्। भक्तिदर्शनम्। स्वामिविवेकानन्दस्तु प्रतिव्यक्तिदर्शनमपि अगदत्। प्रकृतमनुसरामः सर्वेषां दर्शनानां मुख्यमुद्देश्यं कैवल्यप्राप्तिरेव। परन्तु तस्य कैवल्यस्य साक्षात्प्राप्तिस्तु न सम्भवति तत्र सन्ति केचन नियमाः। तेषु अन्तर्नियमाः। यथा सांख्यदर्शने प्रकृतिपुरुषयोः सम्यग्ज्ञानात् सिद्ध्यति अपवर्गप्राप्तिः। वेदान्तदर्शने *'ऋते ज्ञानान्न मुक्तिः'* मीमांसादर्शने कर्मणः प्राधान्यं तच्च कर्म विध्यादिद्धारा प्रतिपादितं स्यात्। योगदर्शने अष्टां[3] योगस्य परिकल्पना 'यमनियमआसनप्राणायामप्रत्याहारधारणाध्यानसमाधिरिति। न्यायदर्शनेऽपि पदार्थतत्त्वज्ञानान्निश्रेयसाधिगमः। वैशेषिकैरपि तथा। नास्तिकेष्वपि एवमेव। निर्धारिते विषये योगसूत्रमिति विषये किञ्चित् वक्तव्यम्। योगसूत्रस्य प्रणेता महर्षिपतञ्जलिरिति। अस्य दर्शनस्यापरं नाम पातञ्जलदर्शनमपि। अस्य दर्शनस्य यच्च मूलं पुस्तकं तत्र चतुर्धा विभाजनमुपलभ्यते। १- समाधिपादः २-साधनपादः ३-विभूतिपादः ४-कैवल्यपादश्च। प्रतिपादं सूत्राणि ५१ (एकपञ्चाशत्सूत्राणि), ५५., (पञ्चपञ्चाशत्सूत्राणि), ५५. (पञ्चपञ्चाशत्सूत्राणि), ३४ (चतुस्त्रिंशतसूत्राणि) इति ।

समाधिशब्दार्थः-

तत्र प्रथमपादस्थः समाधिरिति कः पदार्थः इति वक्तुमीहे। वाक्यार्थज्ञाने पदार्थज्ञानं कारणमिति न्यायात् व्याकरणदृष्ट्या सम् आङ् उपसर्गपूर्वकात् 'धा' धातोः 'उपसर्गे घोः किः' (पा.सू.३.३.९२) इति सूत्रेण कि प्रत्यये सति सिध्यति समाधिशब्दः। विग्रहश्चेत्थं समाधीयन्ते निरुध्यन्ते चित्तवृत्तयो यस्मिन् इति समाधिः। योगश्चित्तवृत्ति-निरोधः। पुराणग्रन्थेष्वपि-

तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत्।
मनसा ध्याननिष्पाद्यं समाधि सोऽभिधीयते॥
सरित्पतौ निविष्टाम्बु यथाभिन्नं लयन्त्वियात्।
तथाभिन्नं मनस्तत्र समाधिं सममाप्नुयात् ॥

याज्ञवल्क्योऽपि-

समाधिः समतावस्था जीवात्मपरमात्मनोः।
संयोगो योग इत्युक्तो जीवात्मपरमात्मनोः॥

जलसैन्धवयोरैक्यं यथा भवति योगतः।
तथाऽत्ममनसोरैक्यं समाधिरिह भज्यते ॥
सोऽहं चिन्मात्रमेवेति चिन्तनं ध्यानमुच्यते।
ध्यानस्य विस्मृतिः सम्यक् समाधिरभिधीयते ॥

योगियाज्ञवल्क्यः –

निर्विकारतया वृत्वा ब्रह्माकारतया पुनः ।
वृत्ति विस्मरणं सम्यक् समाधिरभिधीयते ॥

त्रिशिखिब्राह्मणे

ध्यातृध्याने परित्यज्य क्रमाद् ध्येयैकगोचरम् ।
निवातदीपवच्चित्तं समाधिरभिधीयते ॥

अध्यात्मोपनिषदि
समाधिप्रशंसा –

समाधिनिर्धूतमलस्य चेतसो। निवेशितस्यात्मनि यत्सुखं लभेत्।
स शक्यते वर्तयितुं गिरा तदा। स्वयं तदन्तः करणेन गृह्यते॥
अपामपोऽग्निमग्नो वा व्योम्नि व्योम न लक्षयेत् ।
एवमन्तर्गतं चित्तं पुरुषः प्रतिमुच्यते ॥

समाधिभेदाः

समाधिः द्विविधः, सम्प्रज्ञात (सबीजसमाधिः) असम्प्रज्ञातश्च (निर्बीजसमाधिः)। प्रोक्तञ्च –

द्विविधः समाधिरिष्टः सम्प्रज्ञातोऽप्यसंप्रज्ञातश्च।
विषयविशेषाभोगात् फणिना प्रथमश्चतुर्विधः प्रोक्तः॥ ६४

सम्प्रज्ञातः– सम्प्रज्ञायन्ते वितर्कादयोऽस्मिन्निति सम्प्रज्ञातश्चित्तवृत्तिनिरोधलक्षणे समाधौ सर्वपदानुपादानादस्यापि समाधित्वमित्युक्तः। एकाग्रचेतसि यः प्रमाणादिवृत्तीनां बाह्यविषयाणां निरोधः सम्प्रज्ञातसमाधिः। सम्यक् प्रज्ञायन्तेऽस्मिन्न प्रकृतेर्विविक्ततया चित्तमिति व्युपत्तेः।

सम्प्रज्ञातसमाधिश्चतुर्विधः। सवितर्कः, सविचारः, सानन्दः, अस्मितामात्रः।

सवितर्कसमाधिः–पञ्चभौतिकचतुर्भुजादिस्थूलालम्बनो वितर्कः। तेन सहितः सवितर्कः। स्थूलस्वरूपसाक्षात्कार-वती चित्तस्यावस्थाविशेषरूपा या प्रज्ञा तल्लक्षणः।

सविचारसमाधिः– स्थूलभूतकारणीभूतपञ्चतन्मात्रलि३लि३सूक्ष्मविषयो विचारस्तेन सहितस्तदाभोग इति यावत् सविचार इति।

सानन्दसमाधिः– इमौ ग्राह्यविषयौ ग्रहणविषयश्च सानन्द इति। आनन्दश्च आह्लादः।

सत्वप्रधानाह±रजनितानीन्द्रियाण्यपि सुखानि, सत्त्वस्य सुखात्मकत्वात्। आनन्दात्मकेन्द्रियसहितस्तदा भोग इति यावत् सानन्दस्तृतीयः। इन्द्रियाणां जनकत्वात् तेषां सूक्ष्मरूपभूता बुद्धिरिति।

अस्मितासमाधिः- एकात्मिका च सच्चित् नाम अस्मिता।

असम्प्रज्ञातः-असम्प्रज्ञातसमाधेरपि नाना लक्षणानि विवृतानि सन्ति यथा-सकलचित्तवृत्तिनिरोधलक्षणोऽसम्प्रज्ञात-इति। सर्ववृत्तिनिरोधे त्वसम्प्रज्ञातः समाधिः।

सर्ववृत्याभावौपयिकाभ्यासैककारणः सर्वासां क्लिष्टाक्लिष्टवृत्तीनाम् भावस्यौपयिकं कारणं यत्परवैराग्यं तस्य योऽभ्यासः पौनः पुन्येनानुष्ठान स एकस्तदेव कारणं यस्य तादृशः सम्प्रज्ञातिसाधनमसम्प्रज्ञातसिद्धौ न प्रभवतीति भावः। स्वरूपमाह संस्कारमात्रशेष इति सर्वथा निर्विषय इत्यर्थः। सम्प्रज्ञातविलक्षणो निर्बीजऽसम्प्रज्ञात इति यावत्। तथा च स्मर्यते -

मनसो वृत्तिशून्यस्य ब्रह्माकारतया स्थितिः।
असम्प्रज्ञातनामासौ समाधिरभिधीयते॥

असौ असम्प्रज्ञातसमाधि मुनिभिर्द्विविधो गीत इति। तत्र आस्तिकनास्तिकदर्शनभेदात्।

भवकारणो विदेहप्रकृतिलयानाञ्च सौगतादीनाम्।
श्रद्धावतामुपायप्रत्यय उक्तो मुमुक्षूणाम् ॥

द्विविधोऽसमाज्ञातो भवकारणश्चोपायकारणश्चेति। तत्र सौगतादीनां बौद्धादिनास्तिकानां विदेहप्रकृतिलयानां विदेहाश्च प्रकृतिलयाश्च तेषाम्। विदेहास्तावत्-

रसाद्वै शोणितं जातं शोणितान्मांससम्भवः।
मांसात्तु मेदसो जन्म मेदसोऽस्थिसमुद्भवः॥
अस्थनो मज्जा समभवन्मज्जातः शुक्रसम्भवः।
शुक्राद् गर्भः समभवत्ततः पिण्डसमुद्भवः॥ इति ॥

स्मृत्युक्तरक्तमांसमेदोऽस्थिमज्जाशुक्रमज्जाशुक्राख्यषट्कोशनिर्वृत्तो देहस्तद्रहिताः ये खलु भूतेन्द्रियान्यत-ममात्मबुद्ध्योपासते ते च तद्वासनावासितान्तः करणाः पिण्डपातानन्तरं सद्भावमापन्नमण्डूकदेहवद् भूतेन्द्रियेषु विलीना विदेहा इत्युच्यन्ते। एवमव्यक्तादिष्वष्टाविधप्रकृतिषु लीनाः प्रकृति लीनाः प्रकृतिलया इत्युच्यन्ते। तेषां भवकारणः भवत्यस्मादिति भवोऽविद्या तत्कारणोऽसम्प्रज्ञातो भवति। असम्प्रज्ञातत्वञ्चात्र वृत्तिनिरोधमात्रेण समाधि-संस्काराणां तत्र सत्त्वात्। अविद्यामूलकत्वादेव तेषां साधिकारतया यथाकालं प्रमाप्य पुनर्वर्षासु धारानिपातै-र्मण्डूकदेहवत् प्राक्तनसंस्कारैः प्रादुर्भावात्। तथा च स्मर्यते-

दृश मन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः।
भौतिकास्तु शतं पूर्णं सहस्रन्त्वाभिमानिकाः ॥

समाधिफलम् -

समाधिः यद्यपि एकं पृथग् योगा३म् परन्तु अन्येषाम३नामाभावे स न सिध्यति। तदर्थं धारणा ध्याने इत्यावश्यके अ३ स्तः। धारणाध्यानयोः निमित्तानि यमनियमासनप्राणायामप्रत्याहारेत्यादीनि। विभूतिपादे लिखति आचार्यः देशबन्धश्चित्तस्य धारणा (१)॥ तत्र प्रत्ययैकतानता ध्यानम् (२)। तदेवार्थनिर्भासं स्वरूपशून्यमिव समाधिः (३)। यदा त्रयाणामेकत्र स्थितिः भवति तदा संयमः प्राप्यते। संयमोऽपि आदौ स्थूलविषयेषु ततः परं सूक्ष्मविषयेषु भवति। संयमे सति प्रज्ञालोकः अर्थात् बुद्धिप्रकाशः भवति। धारणाध्यानसमाधयोऽपि

निर्बीजसमाध्यपेक्षया बहिर[3]ा: सन्ति। समाधिफलं संयम:। अभ्यासवैरागाभ्यां वृत्तिनिरोध:।

समाधेरुत्पत्ति:- समाधेरुत्पत्ति: पञ्चवृत्तीनां क्लिष्टाक्लिष्टानां यदा चित्तात् निर्मोचनं भवति तदा एव समाधिरुत्पद्यते। निर्मोचनोपाय: ***''मैत्रीकरुणामुदितोपेक्षाणां सुखदु:खपुण्यापुण्यविषयाणां भावनातश्चित्त-प्रसादनम् ''*** इति। 'प्रच्छर्दनविधारणाभ्यां वा प्राणस्य' ३४ प्राणवायो: बारं बारं ग्रहणनिग्रहणाभ्यामपि चित्तं शुद्धयति। शुद्धचित्ते एव समाधिरुत्पद्यते तेनैव शुद्धचित्तेन कैवल्यस्य प्राप्तिर्भवति। नान्येनापि केनापि उपायेन। अभ्यासवैराग्याभ्यां वृत्तिनिरोध: तत्र स्थितो यत्नोभ्यास:। प्रकाशप्रवृत्तिरूपवृत्तिरहितस्य वित्तस्य स्वरूपनिष्ठ: परिणामविशेष: स्थिति:। प्रोक्तं च-

चित्तशुद्धिरेव मोक्षेऽपेक्षिता न तु क्रियैश्वर्यं ज्ञानैश्वर्यं वा। तदुक्तं योगभाष्ये एतस्यामवस्थायां कैवल्यं भवति। अत्र सन्देह: यद्यपि सर्वे प्राणिन: प्राणवायुं प्रतिमुहूर्तं नयन्ति त्यजन्ति च। परन्तु तत्र कथं मे समाधिर्भवति तदा उच्यते शास्त्रनिर्दिष्टप्रक्रियया यदि कोऽपि प्राणायामादिकं सम्पादयति तदा एव समाधिमार्ग अग्रसरो भवति यथा-

श्रुत्योर[3] ष्ठकौ मध्यांगुल्यौ नासापुटद्वये।
सृक्किणो: प्रान्त्यको पान्त्या[3] ली शेषे दृगन्तयो: ॥
न्यस्यान्तर्भूपृथिव्यादितत्त्वज्ञानं भवेत् क्रमात्।
पीतश्वेतारुणश्यामैबिन्दुभिर्निरुपाधि खम्॥
दह्यन्ते ध्यायमानानां धातूनां हि यथा मला:।
प्राणायामैस्तु दह्यन्ते तद्वदिन्द्रियपन्नगा:॥

एकतानं चित्तमेकाग्रमुच्यते। निरुद्धसकलवृत्तिकं संस्कारमात्रशेषं चित्तं निरुद्धमिति भण्यते।

समाधेरपरपर्याया: शब्दा: - समाधिर्नाम भावना। समापत्ति: योग:, मधुमती ज्योतिष्मती, सविकल्पनिर्विकल्प:। सबीजनिर्बीजसमाधि:। धर्ममेधसमाधि:।

समाधे: ह्रासकारणम् -यद्यपि गर्भाधानात् प्राणिन: समाधिस्थ एवं जगति पदार्पणं करोति तथापि यदा यदा वर्धते तदा एकादशेन्द्रियै: सम्पृक्त: सन् चित्तमिन्द्रियप्रणालिकयाभिसम्बध्योपरञ्जयति। तस्मात् ये चित्तस्य धर्मा तत्रैव प्राणिन: व्यस्ता: सन्त: आत्मापर्यन्तं गन्तुमसमर्था: भवन्ति। यदि वृत्तिनिरोध एव योग: समाधिस्तदा सुषुप्त्यादी विक्षिप्तमूढादिचित्तवृत्तीनां निरोधसम्भवाद्योगत्वप्रसंग:। इति चेन्न। क्षिप्ताद्यवस्थासु क्लेशप्रहाणादेरसम्भवान्न: श्रेयसपरिपन्थित्वाच्च। ते च क्लेशा:

१. अथ योगानुशासनम् इत्यत्र अथ शब्द: मंगलार्थक: आरम्भार्थकाश्च। स्वरूपत: मंगलार्थक: अर्थत: आरम्भार्थक:। योगशब्द: समाधिपर्याय:।

२. अनुशासनमिति शास्त्रम्। अनुशिष्यते व्याख्यायते लक्षणभेदोपायसकलहितयोगो येन तदनुशासनम्।

३. योगानुशासनस्य वक्ता क:? याज्ञवल्क्य: वदति 'हिरण्यगर्भो योगस्य वक्ता नान्य: पुरातन:। इति स्मृत्या पतञ्जलि: कथं योगस्य शासितेति इति चेन्न अत एव तत्र पुराणादौ विशिष्य योगस्य विप्रकीर्णतया दुर्ग्राह्यार्थत्व मन्यमानेन भगवता कृपासिन्धुना फणिपतिना सारं सञ्जिघृक्षुणा अनुशासमारब्धं न तु साक्षाच्छासनमिति।

४. अत्र युजिर् योगे इति संयोगार्थकतया परिपठितात् युजेर्निष्पन्नो योगशब्द: संयोगवचन एव स्यान्नतु निरोधवचन:।

अत एवोक्तं याज्ञवल्क्येन-

संयोगो योग इत्युक्तो जीवात्मपरमात्मनोः।
निपातश्चोपसर्गाश्च धातवश्चेति ते त्रयः।
अनेकार्थाः स्मृताः सर्वे पाठस्तेषां निदर्शनम् ॥

उपसंहारः - प्रश्नः भवति यत् पुष्करपलाशवन्निर्लेपस्य तस्य आत्मनः तापः कथमुत्पद्यते येन परमेश्वरोऽनुग्राहकतया कक्षीक्रियते इति चेदुच्यते तापकस्य रजसः सत्वमेव तप्यं बुद्धयात्मना परिणमते इति सत्वेः परितप्यमाने तमोवशेन तदभेदावगाहिपुरुषोऽपि तप्यत इत्युच्यते। उक्तञ्च च-

सत्वं तप्य बुद्धिभावेन वृत्तं भावा ते वा राजसास्तापकास्ते ।
तप्याभेदग्राहिणी तामसी वा वृत्तिस्तस्यां तप्य इत्युक्तमात्मा॥

इत्थं तप्यमानस्य पुरुषस्यादरनैरन्तर्यदीर्घकालानुबन्धियमनियमाद्यष्टांगयोगानुष्ठानेन परमेश्वरप्रणिधानेन च सत्त्वपुरुषान्यताख्यातावनुपप्लवायां जातायामविद्यादयः पञ्च क्लेशाः समूलकाषंकषिता भवन्ति। कुशलाकुशलाश्च कर्माशयाः समूलघातं हता भवन्ति। ततश्च पुरुषस्य निर्लेपस्य कैवल्येनावस्थानं कैवल्यमिति सिद्धम्।

सहायकग्रन्थसूची

१. पातंजलयोगदर्शनम्, डॉ. सुरेशचन्द्र श्रीवास्तवः, चौखम्भासंस्कृतप्रकाशनम्, वाराणसी २०१६
२. याज्ञवल्क्यस्मृतिः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली २०१०
३. पाणिनीय, अष्टाध्यायी चौखम्भा कृष्णदास अकादमी, वाराणसी २००८
४. महाभाष्यम, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली १९९९
५. सिद्धान्तकौमुदी, चौखम्भा संस्कृतसंस्थानम्, वाराणसी २०१०
६. वाक्यपदीयम्, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
७. लघुसिद्धान्तकौमुदी, चौखम्भासंस्कृतभवनम्, वाराणसी २००८
८. व्याकरणशास्त्र का इतिहास, युधिष्ठिरमीमांसकः, रामलालप्रकाशन जयपुरम्
९. पाणिनीयशिक्षा, कालिदाससंस्कृत अकादमी १९९३, प्रो. बच्चूलालअवस्थी

-सह-आचार्यः,
कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः
नलबारी, असमः

वर्तमानसन्दर्भे पाणिनिशिक्षायाः प्रासंगिकता

-डॉ० प्रकाशचन्द्रः जांगी

संस्कृतं साहित्यं नाम विविधज्ञानविज्ञानगुम्फितम्। तच्च लौकिकालौकिकभेदेन भागद्वये विभज्यते। तत्रालौकिकसंस्कृतसाहित्ये चत्वारो वेदाः गण्यन्ते। तच्च इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति सः वेदः। अपौरुषेयं वाक्यं वेदः।

वेदाः अनन्तज्ञानराशेः अक्षय्यभण्डाराः सन्ति। येन वैदिकज्ञानप्रकाशेनाद्य मानवः ज्योतिर्मान् भवति। वैदिकसाहित्यस्यास्य अध्ययनाध्यापनाय यस्य साहित्यस्य निर्माणमभवत्। तन्नाम सूत्रसाहित्यम्। सूत्रसाहित्येऽस्मिन् वेदा३नि अभिगण्यन्ते। चत्वारो वेदाः षट् च तद३नि। अंग्यन्ते ज्ञायन्ते एभिरिति अंगानि, इमानि वेदांगानि संख्यादृष्ट्या षड् सन्ति। तथा हि छन्दशास्त्रं वेदस्य पादौ तस्मादृते न ऋचां गतिः साधुतां लभेत। धर्म-गृह्य-श्रौत-शुल्बसूत्रभेदेन कल्पो नाम वेदस्य हस्तौ पठ्यते, न हि पाणिं विना कर्म साधयितुं प्रभवेत्। ग्रहनक्षत्रगतिज्ञापकं ज्योतिषं वेदस्य चक्षुः, तद् विहाय अन्ध इव वेदेषु भ्राम्येत्। निरुक्तं वेदस्य श्रोत्रं भवति, तद्विना श्रुतोऽपि वेदः खलु अश्रुत एव स्यात् सार्थकवेदग्रहणाभावात्। शिक्षा वेदस्य घ्राणम्, तस्या अपुरस्कारेण वर्णनिष्पत्तिरूपो गन्धोऽपि न गृह्येत। व्याकरणं च वेदस्य मुखम्, तद्विना किं कथमुच्येत? तस्मात् सा३गं वेदमधीत्यैव ब्रह्मलोके महीयते पूज्यते। निर३स्य हि न स्वरूपलाभ इति। वेदा३नां सर्वप्रथमुल्लेखः मुण्डकोपनिषदि प्राप्यते।

तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषं इति।[1]

तद्यथा पाणिनिशिक्षायाम्-

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात्सा३ मधीत्यैव ब्रह्मलोक महीयते॥[2]

शिक्षाग्रन्थेष्वपि प्रातिशाख्यग्रन्थानि प्रमुखानि सन्ति। यथा ऋग्वेदप्रातिशाख्यम्, अथर्ववेदप्रातिशाख्यम्, वाजसनेयिप्रातिशाख्यम्, तैत्तिरीयप्रातिशाख्यम्, सामवेदीय प्रातिशाख्यद्वयमुपलभ्यते प्रथमं पुष्पसूत्रं, द्वितीयं ऋक्तन्त्रं च। प्रातिशाख्यग्रन्थातिरिक्तानि कानिचन शिक्षाग्रन्थास्सन्ति। ते च पाणिनीय शिक्षा, याज्ञवल्क्यशिक्षा, वाशिष्ठीशिक्षा, कात्यायनीशिक्षा, पाराशरीशिक्षा, माण्डव्यशिक्षा, माण्डूकीशिक्षा इत्यादयः।

तेष्वपि शिक्षाग्रन्थेषु पाणिनिशिक्षा सर्वप्रमुखा। षड३ो वेदोध्येतव्यः तत्र च शिक्षा प्रथमा अथ शब्दानुशासनात् शिक्षेयं वेदांगेषु अन्यतमत्वं भजति। तैत्तिरीयोपनिषदि अपि शिक्षायाः षड३ानां परिचयो प्राप्यते। तद्यथा-शिक्षां व्याख्यास्यामः वर्णः स्वरः, मात्रा बलम्, साम सन्तानः इत्युक्तः शिक्षाध्यायः।[3]

१. मुण्डकोपनिषद् १-१-५

२. पा. शि. ४१/४२

३. तैत्तिरीयोनिषद् द्वितीय अनुवाक

वर्णः स्वरः, मात्रा बलम्, साम सन्तानः इत्युक्तः शिक्षाध्यायः सूत्रेऽस्मिन् वर्णः इत्यनेन अकारादिहान्तपर्यन्ताः वर्णाः गृह्यन्ते। स्वरः इत्यनेन उदात्तानुदात्तस्वरिताः इति एतेषां ग्रहणं वर्तते। पुनश्च मात्रा नाम ह्रस्वदीर्घादिमात्राः बलं-बाह्याभ्यन्तरप्रयत्नाः बले अन्तर्भवति। साम इत्यनेन उच्चारणे सामत्वम् इति अभिप्रायः वर्तते।

शिक्षायाः व्युत्पत्तिलभ्योऽर्थः अस्ति शिक्षा शिक्ष् विद्योपादाने स्वरवर्णाद्युच्चारणप्रकारो यत्रोपदिश्यते सा शिक्षा।

शिक्षाशब्दस्य निष्पत्तिः-शिक्ष् विद्योपादाने इति धातोः गुरोश्च हलः इति सूत्रेण 'अ' प्रत्ययेन शिक्षाशब्दस्य निष्पत्तिर्भवति, अस्य शिक्ष्यते अनया सा शिक्षा इति व्युत्पत्तिर्भवति।

एको वर्णः सम्यक् ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग् भवति।[४]

अस्मिन् लोके तादृशं ज्ञानं न विद्यते यत् शब्दं विना अनुगमनं भवेत्। अतः सर्वविधं ज्ञानं शब्देन सह युक्तमिव भासते। शब्दादृते किमपि ज्ञानं न विद्यते इति यावत्। तद्यथा-

इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।[५]

शिक्ष्यते अनया वर्णोच्चारणमिति शिक्षा। यत्र वर्णस्वराद्युच्चारणप्रकारः उपदिश्यते सा शिक्षा भवति। अकारादिवर्णानां स्थलकरण-प्रयत्नबोधिका अकुहविसर्जनीयानां कण्ठ्याः इत्यादिका वा शिक्षा भवति। इयं च शिक्षा षड्[६]षु अन्यतमा वर्तते। शब्दानां उचितोच्चारणं स्थानप्रयत्नं च सर्वे जानीयुः इति पाणिनिशिक्षायाः प्रयोजनं अस्ति। सा च-

अथ शिक्षां प्रवक्ष्यामि पाणिनीयं मतं यथा।
शास्त्रानुपूर्व्यं तद्विद्याद्यथोक्तं लोकवेदयोः।।[७]

अर्थात् लोकप्रसिद्धमपि उच्चारणं शब्दार्थं वा साधूच्चारणबोधरहितैः अबुद्धिभिः शब्दापशब्दज्ञानबोधकं विना ज्ञातुं न शक्यते। तच्च पाणिनीयं मतं यथा लोके वेदे चोक्तं तथा शास्त्रानुपूर्वं पूर्वाचार्यपरम्परागतानुशासनपूर्वकं विद्यात् विजानीयात् नहि लोकेऽपि साधुशब्दोच्चारणमपशब्दनिरसनं च परम्परानुगतशास्त्रादृते सम्भवतीत्याशयः।

पदक्रमविभागज्ञो वर्णक्रमविचक्षणः।
स्वरमात्राविशेषज्ञो गच्छेदाचार्यसम्पदम्।।[७]

ननु लोके शिक्षाविदामेवाचार्यत्वसम्पत्तिरिति तात्पर्यम्। ननु लोके लौकिकैः वेदे च वैदिकैः आप्तैः यथा शब्दः उच्चार्यते तथा शिष्याः अपि उच्चारयेयुः।

पाणिनीयशिक्षानुसारेण वर्णाः वर्णसंख्या च-

वर्णयति इति वर्णः, संस्कृतवाङ्मये आहत्य चतुष्षष्टिर्वर्णाः सन्ति। वैदिकभाषायां लौकिकभाषायां च आहत्य त्रिषष्टिः चतुष्षष्टिः वा वर्णाः सन्ति। तद्यथा-

४. महाभाष्यम् - ६,१,८४
५. काव्यमीमांसा- १-४
६. पा. शि. ०३
७. ऋग्वेदप्रातिशाख्यम्- ०१,०८

त्रिषष्टिश्चतुः षष्टिर्वा वर्णाः शम्भुमते मताः।
प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयम्भुवा।।[८]

कतिसंख्या वर्णाः सन्तीत्याह त्रिषष्टिश्चतुष्षष्टिर्वा इति। कुत्र ते वर्णाः प्रयुज्यन्त इत्याह प्राकृते संस्कृते चापीति प्राकृतमिह खलु वैदिकं वचः, तत्र हि व्याकरणशास्त्रीयाः संस्काराः न प्रभवन्तीति कृत्वा प्रकृत्यैव निष्पन्नम्। कल्पादौ स्वयम्भुवा ब्रह्मणा स्वयमेव प्रोक्ता इमे वर्णा इत्याचार्यपरम्परासूचिता।

अग्रे पाणिनिशिक्षायां वर्णगणना –

स्वराः विंशतिरेकश्च स्पर्शानां पंचविंशतिः।
यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः।
अनुस्वारो विसर्गश्च क-पौ चापि पराश्रितौ।
दुःस्पृष्टश्चेति विज्ञेयो लृकारः प्लुत एव च।।[९]

स्वराः एकविंशतिः, पंचविंशतिः स्पर्शाः, अष्टाध्याय्यां कादयोमावसानाः स्पर्शाः, अष्टौ यादयः, चत्वारो यमाः, अनुस्वारविसर्ग–जिह्वामूलीयोपध्मानीयाः, लृकारः प्लुत एव चेति एवं त्रिषष्टिश्चतुष्षष्टिवर्णाः गण्यन्ते।

स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः।
इति वर्णविदः प्राहुर्निपुणं तन्निबोधत।।[१०]

यथा–प्रथमः स्वरतः अचि अच्विषये अकारादिषु त्रयः स्वराः ज्ञेयाः। के ते इत्याह उदात्तश्चानुदात्तश्च स्वरितश्चेति। तथा कालतो ह्रस्वो दीर्घः प्लुत इति नियमाः। तद्यथा–

उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः।
ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि।।[११]

वर्णानाम् उच्चारणस्थानानि–

अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।
जिह्वामूलं च दन्ताश्च नासिकौष्ठौ च तालु च।।[१२]

एवं वर्णानाम् अष्टौ स्थानानि, तानि च उरः, कण्ठ, शिरः, जिह्वामूलं, दन्ताः, नासिका, नासिकोष्ठौ तालु चेति तथैव पाणिनिना अष्टाध्याय्यां वर्णोच्चारणस्थानानि एवं प्रतिपादितानि–अकुहविसर्जनीयानां कण्ठः, इचुयशानां तालुः, ऋटुरषाणां मूर्धा, लृतुलसानां दन्ताः, उपूपध्मानीयानाम् ओष्ठौ। लौकिके साहित्ये वर्णान् कथं प्रयोजयेदिति विषये उक्तमस्ति–

यद्वत् पतनभेदाभ्यां भीता व्याघ्री यथा दंष्ट्राभ्यां पुत्रान् हरेत् न च पीडयेत् तद्वद् वर्णान् काव्ये प्रयोजयेत्। यथा मार्जारी तीक्ष्णाभ्याम् अपि दंष्ट्राभ्यां स्वशावकान् हरन्ती तथा वहिता भवति यथा शिशोः पीडा न भवेत्, न च पतेत् त वा भिद्येत।

---

८. पा. शि. ०३
९. पा. शि. ०४–०५
१०. पा. शि. १०
११. पा. शि. ११
१२. पा. शि. १३

व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत्।
भीता पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत्।।[१३]

तथैव वर्णान् प्रयुंजानो वर्णान् न पीडयेत्, न पातयेत् न वा भिन्द्यात्। वर्णानाम् अस्पष्टतैव पातः विकृतोच्चारणं च भेदः, ताभ्यां भीतभीतेन उच्चारयित्रा सावधानेन भवितव्यमिति भावोऽस्ति। यथोक्तरीत्या वर्णाः प्रयोक्तव्याः ते चोच्चारणकाले नाव्यक्ताः स्युः। इत्थं सम्यग् वर्णानां प्रयोगेण प्रयोक्ता ब्रह्मलोके महीयते पूज्यते। तद्यथा–

एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीडिताः।
सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते।।[१४]

याज्ञवल्क्यशिक्षायामप्युक्तमस्ति–***मधुरं चापि नाव्यक्तं सुव्यक्तं न च पीडितम्।***[१५]

पाणिनिशिक्षायां मात्राकालज्ञानाय प्रस्तौति–

चाषस्तु वदते मात्रां द्विमात्रं चौव वायसः।
शिखी रौति त्रिमात्रं तु नकुलस्त्वर्धमात्रकम्।।[१६]

चाषो नीलकण्ठो मात्रां वदति, वायसः काको द्विमात्रं दीर्घं त्वेव वदति। शिखी मयूरस्त्रिमात्रं प्लुतं रौति। नकुलस्तु पुनरर्धमात्रकं व्यंजनकालमुच्चारयति। तदेवं मात्राज्ञानपूर्वकम् एवोच्चारणीयमिति भावः।

साधुपाठेन पापान्मुक्तिः चित्तशुद्धिर्वा भवति न असाधुपाठेनेत्याह। इह लोके शास्त्रसम्मतं सुव्यवस्थितं प्रत्यक्षरं सुनिश्चितप्रयोगसम्पन्नं शब्दो सुस्वरेण राजते शोभते च।

पाणिनिशिक्षायाम् अधमपाठकः–

गीति शीघ्री शिरः कम्पी तथा लिखितपाठकः।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः।।[१७]

यो गायन् पठति सः गीति, शीघ्रपाठशीलः शीघ्री शिरः कम्पयति तच्छीलः शिरः कम्पी, अथवा शिरसः कम्पः शिरः कम्पोऽस्ति यस्य सः शिरो धुन्वन् पठति। तथा लिखतिपाठकः, पठितुं न जानानोऽपि लिखतिमेव कथंचित् पठितुं यतते। अर्थं जानातीति अर्थज्ञः, नार्थज्ञः इत्यनर्थज्ञः यो नाम पठन्नपि नार्थं संक्रामयितुं प्रभवति, अस्थाने विरामं छेदं वा करोति। अल्पकण्ठश्च यस्य वाग्यन्त्रमेव तथा स्वल्पं भवति यथा श्रोतारं क्लिश्नाति कर्णयोः एते षट् पाठकेषु अधमाः भवन्ति। दोषाभावे गुणो भवति। तदतिरिक्तान् गुणाननुपदं वक्ष्यति मार्धुयमित्यादि–

पाणिनिशिक्षायाम् उत्तमपाठकः–

माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।
धैर्यं लयसमर्थं च षडेते पाठकाः गुणाः।।[१८]

माधुर्यं सुश्रवता श्रुतिप्रियता च, अक्षराणां व्यक्तिं स्पष्टता, या च कर्णसुखं न लीयेत। पदच्छेदः पदानां यथार्हयतिरर्थानुसारी विरामश्च, येनार्थस्य विविक्तता स्यात्। सुस्वरः अनुनाऽसौष्ठवयुक्तः शोभनः कण्ठस्वरः, धैर्यं

१३. पा. शि. २५
१४. पा. शि. ३१
१५. याक्षवल्वयशिक्षा– २,७१,१
१६. पा. शि. ४९
१७. पा. शि. ३२
१८. पा. शि. ३३

येन त्वरा न प्रतीयेत। येन न वक्तुः पाठ्ये वस्तुनि स्वाधिकारे ज्ञायेत। लयसमर्थं च तद् धैर्यं स्यात्। धैर्येण लयसामर्यं निरूप्यते। द्रुत-मध्य-विलम्बितेषु लयेषु यथायथमधिकारः खलु अपेक्ष्यते। तथा च यथापेक्षं लयाल्लयान्तरे गतिर्न विरुध्येत। इत्येते षट् पाठकीयाः गुणाः। वेदपाठे स्वराणां महत्त्वपूर्णं स्थानं विद्यते। तस्य महत्त्वविषये पाणिनिशिक्षायां निगद्यते।

मन्त्रो हीनः स्वरतो वर्णतो वा
मिथ्या प्रयुक्तो न तमर्थमाह
स वाग्वज्रो यजमानं हिनस्ति
यथेन्द्रशत्रुः स्वरतोऽपराधात्।।[१९]

अर्थात् वर्णोच्चारणे शब्दोच्चारणे वा दोष आयाति चेत् का तर्हि हानिः स्यादित्याह। इति विषये अधोलिखितानि नैकानि उद्धरणानि एवं सन्ति।

आधुनिकोच्चारणदोषाः-

साम्प्रतिके काले पाठकैः उच्चारणकाले बहवः दोषाः क्रियन्ते। तेषां परिहारोऽपि अत्यावश्यको वर्तते। अतः पाणिनीयशिक्षाग्रन्थे ये पाठकगुणाः उद्धृतास्सन्ति ते तु पाठकैः स्वीकरणीयाः तथा च ये पठनकाले दोषाः जायन्ते ते यथाकालं परित्याज्याः एव। अतः प्रसंगेऽस्मिन् ये सामान्यतया छात्रैः पाठकैः वा दोषाः क्रियन्ते ते यथाकालं पाणिनीयशिक्षानुसारं त्याज्याः।

तद्यथा-

अनुस्वारोच्चारणदोषः-अनुस्वारः नासिकयोच्यते, तद्यथा नासिकानुस्वारस्य। अनुस्वारः स्वरवर्णानन्तरं व्यंजनवर्णात् पूर्वं उच्चार्यते। उत्तरभारते अनुस्वारः नकाररूपेण प्रयुज्यते दक्षिणे च मकाररूपे।
तद्यथा-उत्तरे अंशः, अन्शः, अम्शः।

शकारोच्चारणदोषः-तद्यथा तालव्यः शकारः उच्चारणदोषात् जनैः दन्त्यसकाररूपेण प्रयुज्यते। यथा वैदेशिकप्रभावाद् आधुनिके काले पश्चात्, पश्चिम, श्च इति वर्णाः इत्यादिषु शब्देषु तालव्यशकारोऽपि दन्त्यसकाररूपेण उच्चार्यते, तदनुचितम् यतोहि व्याकरणे इचुयशानां तालुः। अस्य शकारस्योच्चारणं तालव्यं वर्तते अतः उच्चारणकाले शकारोऽयं तालु स्थाने नैवोच्चारणीयः न तु दन्त्यसकाररूपेण।

षकारोच्चारणदोषः-तद्यथा मूर्धन्यषकारः क्षेत्रप्रभावात् उच्चारणदोषात् कष्टादिशब्देषु दन्तमूलीयरूपेण प्रयुज्यते तदपि अनुचितमेव, यतोहि व्याकरणे ऋटुरषाणां मूर्धा। अतः मूर्धन्यषकारः मूर्धया उच्चारणीयः।

क्षकारोच्चारणदोषः-वर्णोऽयं संयुक्ताक्षरः ककारषकारयोः संयोगेन क्षकारः निर्मीयते। वर्णोऽस्मिन् ककारस्तु स्पष्टतया श्रूयते परंच षकारः न तादृशः अतः वर्णस्यास्योच्चारणे सावधानतया भवितव्यमिति भावः यतो हि व्याकरणे ऋटुरषाणां मूर्धा, वर्णोऽयं मूर्धन्यस्थानीयः भावः।

ज्ञकारोच्चारणदोषः-वर्णोऽयं संयुक्ताक्षरः, चवर्गस्य तृतीयपंचमवर्णयोः संयोगेन निष्पद्यते। अतः वर्णस्यास्योच्चारणेऽपि अवधानेन भवितव्यमिति।

---

१९. पा. शि. ५२

उपसंहारः-वस्तुतस्तु पाणिनिशिक्षाग्रन्थः वर्णसंख्याबोधकः, साधुशब्दज्ञापकः, साधूच्चारणबोधकः, शब्दापशब्दप्रबोधकः, मात्राकालनिबोधकः, वर्णोच्चारणस्थानप्रतिपादकः चास्ति। ग्रन्थेऽस्मिन् निगदितमस्ति यत् वर्णान् प्रयुंजानो वर्णान् न पीडयेत् न पातयेत् न वा भिन्द्यात्। उच्चारयित्रा सावधानेन भवितव्यमिति भावोऽस्ति।

वर्तमानसन्दर्भे पाणिनिशिक्षायाः महती आवश्यकता प्रासंगिकता च अनुभूयते। यतो हि आधुनिकयुगे पाठकाः शब्दोच्चारणे वर्णोच्चारणे च नैकान् दोषान् कुर्वन्ति। तान् दोषान्निराकर्तुं पाणिनिशिक्षेयम् अध्येतव्या।

अनया शिक्षया सर्वे दोषाः अपगच्छन्ति अतः भाषाशिक्षणे पाणिनिशिक्षा प्रथमं पाठनीया। यतो हि साधुपाठेन पापान्मुक्तिः, चित्तशुद्धिर्वा भवति, न असाधुपाठेनेत्याह। इह लोके शास्त्रसम्मतं सुव्यवस्थितं प्रत्यक्षरं सुनिश्चितप्रयोगसम्पन्नं शब्दो सुस्वरेण राजते शोभते च।

इति शम्।।

सन्दर्भग्रन्थसूची

१- पाणिनिशिक्षा, अवस्थी बच्चूलालो ज्ञानोपाह्वः, उज्जयिनीस्थ-कालिदास-अकादमी

२- संस्कृत साहित्य का इतिहास- उमा शंकर शर्मा ऋषि, चौखम्बा भारती अकादमी

३- मुण्डकोपनिषद्, गीताप्रेस , गोरखपुर

४- तैत्तिरीयोपनिषद् गीताप्रेस , गोरखपुर

५- लघुसिद्धान्तकौमुदी, वरदराज, व्याख्याकार डॉ. सुरेन्द्र देव स्नातक, चौखम्बा पब्लिशर्स, वाराणसी

६- ईशादि नौ उपनिषद्-व्याख्याकार हरिकृष्णदास गोयन्दका, गीताप्रेस गोरखपुर।

७- काव्यादर्शः, दण्डि, भण्डारकर ओरियण्टल रिसर्च इन्स्टीट्यूट, पूना, वर्ष १९३८ ई.

८- पाणिनिशिक्षा, पाणिनिविरचित,सम्पादक-मनोमोहन घोष, प्रकाशन-कलकत्ता विश्वविद्यालय, वर्ष-१३३८ ई.

९- व्याकरणमहाभाष्यम्, पतंजलिविरचित, प्रकाशक-प्रतिभा प्रकाशन, दिल्ली प्रथम संस्करण वर्ष-१९३८ ई.

१०- याज्ञवल्क्यशिक्षा, याज्ञवल्क्यप्रणीत, प्रकाशक-क्षेमराज श्रीकृष्णदास मुद्रणालय, मुम्बई, सम्वत्-१९७५

-सहायकाचार्यः
राजकीय-महाविद्यालयः,
शीतलोतम्, अल्मोड़ा,
उत्तराखण्डः

जैनसंस्कृतौ नार्याः महत्त्वम्

-प्रो. कुलदीपकुमारः

जैनसंस्कृतिः भारतवर्षस्य अत्यन्तप्राचीना संस्कृतिरस्ति। इमां श्रमणसंस्कृतिः, आर्हत्, निर्ग्रन्थ, व्रात्यं, दिगम्बरÁादि नामेभ्यः ज्ञायते।

प्रस्तुतं शोधपत्रमिदं अस्यामेव संस्कृतौ स्त्रेः महत्त्वं प्रतिपादितमस्ति, अस्मिन् विषये संक्षेपेण विचारः भविता। सामान्यदृष्ट्या अन्येषां ग्रन्थानामिव जैनग्रन्थेष्वपि नारीणामसूया सम्प्राप्ता वर्तते, किन्तु गम्भीरतया द्रक्ष्यामः चेत् तदा ज्ञायते यत् सा निन्दा वस्तुतस्तु नास्ति नारीणाम्, अपितु नारीणां कृते नराणां मनस्सु उद्भूतानां दुर्भावस्य निन्दा अस्ति, कामभावस्यास्ति, तीव्रकामासक्तेः अस्ति। जैनग्रन्थेषु अत्यन्तादरेण नार्यः स्मर्यन्ते स्म, यथोक्तं सुप्रसिद्धजैनाचार्येण जिनसेनेन –

विद्यावान् पुरुषो लोके सम्मतिं याति कोविदैः।
नारी च तद्वती धत्ते स्त्रीसृष्टेरग्रिमं पदम्।।[१]

अर्थात् यथा लोके विद्यावान् पुरुषः विद्वद्भिः सम्मानितः भवति तथैव विद्यावती नारी अपि सर्वश्रेष्ठपदं प्राप्नोति। किन्तु नास्त्यस्यायमर्थः यत् जैनाचार्यदृष्ट्यां सर्वाः नार्यः सम्पूजिताः उत्तमाः पूज्याः या भवन्ति अपितु नैकाः नार्यः अधमाः निन्द्याः अपि भवन्ति। जैनः महाकविः धनञ्जयः नारीणां पर्यायवाचिनं कथयन् ताः द्विधः विभक्तवान् – १. प्रिया स्त्री २. कुलटा स्त्री।

स्त्री नारी वनिता मुग्धा भामिनी भीरुर३ ना।
ललना कामिनी योषिद् योषा सीमन्तिनी वधुः।।
नितम्बिन्यबला बाला कामुकी वामलोचना।
भामा तनूदरी रामा, सुन्दरी युवतिश्चला।।[२]

अर्थात् स्त्री, नारी, वनिता, मुग्धा, भामिनी, भीरुः, अ३ना, ललना, कामिनी, योषित्, योषा, सीमन्तिनी, वधुः, नितम्बिनी, अबला, बाला, कामुकी, वामलोचना, भामा, तनूदरी, रामा, सुन्दरी, युवती च, एतानि नारीणा नामानि सन्ति।

भार्या जाया जनिः कुल्या कलत्रं गेहिनी गृहम्।
महिला मानिनी पत्नी तथा दाराः पुरन्ध्रयः।।[३]

अर्थात् भार्या, जाया, जनिः, कुल्या, कलत्रम्, गेहिनी, गृहम्, महिला, मानिनी, पत्नी, दारा पुरन्ध्रिः च एतानि पत्न्याः नामानि सन्ति।

---

१. आदिपुराण, आचार्य जिनसेन, सर्ग-१६, श्लोक-१८

२. धनञ्जय नाममाला, श्लोक ३०-३१, पृष्ठ-१३

३ धनञ्जय नाममाला, श्लोक-३२, पृष्ठ-१४

वल्लभा प्रेयसी प्रेष्ठा रमणी दयिता प्रिया।
इष्टा च प्रमदा कान्ता चण्डी प्रणयिनी तथा ॥
सती पतिव्रता साध्वी पतिवन्त्येकपत्नयपि।
मनस्विनी भवत्यार्या विपरीता निरूप्यते।[४]

अर्थात् प्रेयसी, प्रेष्ठा, वल्लभा, रमणी, दयिता, प्रिया, इष्टा, प्रमदा, कान्ता, चण्डी, प्रणयिनी एतानि प्रियायाः स्त्रेः नामानि वर्तन्ते, तथा सती, पतिव्रता, साध्वी, एकपत्नी, मनस्विनी, आर्या एतानि पतिव्रतायाः शीलवत्याः स्त्रेः नामानि सन्ति।

बन्धकी कुलटा मुक्ता पुनर्भूः पुंÁली खला।
स्पर्शाऽभसारिका दूती स्वैरिणी शम्भली तथा ॥
गणिका लज्जिका वेश्या रूपाजीवा विलासिनी।
पण्यस्त्री दारिका दासी कामुकी सर्ववल्लभा ॥[५]

अर्थात् बन्धकी, कुलटा, मुक्ता, पुनर्भू, पुंÁली, खला, स्पर्शा, अभिसारिका, दूती, स्वैरिणी, शंभली–एतानि कुलटायाः नामानि भवन्ति। तथा गणिका लज्जिका, वेश्या, रूपाजीवा विलासिनी, पण्यस्त्री, दारिका, दासी, कामुकी और सर्ववल्लभा एतानि वेश्योस्त्रेः नामानि सन्ति।

जैनसंस्कृतेः मूलमागमग्रन्थाः भवन्ति। एषु नारीणां महत्त्वस्य ताषाञ्च श्लाघनीयतथ्यानां नैकशः उल्लेखं वर्तते। एषु ब्राह्मी, सुन्दरी, चन्दना, मृगावती इत्यादीनां नारीणां चर्चा सम्प्राप्ता अस्ति याभिः सांसारिकविरक्तिं प्राप्य साधमार्गमनुसृत्य आमानवजातिः उपकृता। भगवतः महावीरस्य शिष्या आर्यचन्दनायाः सान्निध्ये एकेन विशालेन साध्वीवर्गेण चरित्रस्य पालनं सम्यक्तया कृतम्। कौशाम्बिनरेशस्य शतनीकस्य भगिनी जयन्ती ऐश्वर्यपूर्णजीवनं त्यक्त्वा साध्वी बभूव।[६]

Âताम्बरपरम्परानुसारे मल्लिकाकुमारी तीर्थ±रपदं समल±रोत्।[७] अतः उक्तं यत् नारी प्रत्यक्षतः धर्मसाधनायां पुरुषसमा योग्या च मन्यते।[८] सन्दर्भेऽमुष्मिन् इदमपि स्वीकृतं यत् आगारानागारयोः धर्मणोः दृष्ट्यां आदिमः स्त्रीणां कृते गृहस्थधर्मस्य आगारधर्मस्य वा शिक्षां दद्यात्।[९] तथा नार्यः आर्यिकानां रूपे अनगारधर्मं पालयितुमपि स्वतन्त्राः आसन्।[१०] वर्धमानकविना उक्तं यत् राजीनां विशिष्टा रुचिरासीत् धार्मिककार्येषु अथ च व्रतोपवासादिमाचरन्ति स्म।[११]

जैनदर्शनानुसारं आध्यात्मिकसाधनायाः क्षेत्रे नारीप्रवेशस्य मान्यता आसीत्। वरा३चरितमहाकाव्यानुसारं स्त्रीत्वेन आर्यिकाः जैनमूलतत्त्वान् आत्मसातीकृतवन्ती स्म। यथा–

---

४. धनञ्जय नाममाला, श्लोक ३३–३४ पृष्ठ–१४
५. धनञ्जय नाममाला, श्लोक ३५–३६ पृष्ठ–१४
६. जैन आगम साहित्य में भारतीय समाज, जगदीश चंद्र जैन, पृष्ठ–२५२–२५३
७. धर्मकथा तथा कल्पसूत्र टीका २
८. वरा३चरितमहाकाव्य, आचार्य जयसिंहनंदी, २२/२८
९. वरा३चरितमहाकाव्य, आचार्य जयसिंहनंदी, ३१/१–७
१०. वरा३चरितमहाकाव्य, आचार्य जटासिंहनंदी ३१/१–७
११. वरा३चरितमहाकाव्य, आचार्य जटासिंहनंदी, ३१/१,७

तांÁ प्रकृत्यैव कलाविदग्धा जात्यैव धीरा विनयैर्विनीता।
आचारसूत्रानयप्रभानाधीयते स्माल्पतमैरहीभिः।।[१२]

जैनसंस्कृतौ प्राकृतकथासाहित्यस्य स्थानं महत्त्वपूर्णं वर्तते। आसु कथासु समाजस्य विभिन्नानां वर्गाणां महत्त्वपूर्णानाञ्च विषयाणां उल्लेखं कुर्वन्तः नारीपात्राणां सदाचरणं, शीलं, त्यागं, साहसं, कला-कौशलं, वात्सल्यं उत्कृष्टप्रेमचादिजीवनमूल्यान् तेषाञ्च महत्त्वं प्रदर्शितमस्ति, यत् वर्तमानकालेऽपि स्वस्थसमाजस्य निर्माण समृद्धये अनुकरणीयं प्रेरणास्पदञ्चास्ति। प्राकृतकथासाहित्याचारे नारीसम्बन्धिनः मुख्यतः तिस्रः दृष्टयः प्रकाश्यन्ते अस्माभिः।

१. कन्यादृष्टिः

२. दारदृष्टिः

३. मातृदृष्टिः

कन्या -

तत्कालीनसमाजे परिवारस्य विभिन्नैः सदस्यैस्सह कन्यायाः अपि महत्त्वपूर्णं स्थानमासीत्। पुत्रेण सदृशमेव पुत्र्याः जन्मोत्सवमपि सहर्षं स्वीकृतं आसीत्। 'कुवलयमालाकहा' इत्यनुसारं कुवलयमालायाः जन्मोत्सवः पुत्रजन्मोत्सवस्य अधिकहर्षोल्लासपूर्वकं विहितमासीत्[१३] जन्मनः द्वादशे दिवसे नामकरणसंस्कारं बभूव तस्याश्च पालनस्य व्यवस्था विहिता[१४] 'समराइच्चकहा' इत्यस्यानुसारं विलासवत्याः पालनपोषणाय तस्याः मातापितरौ धायीं नियुक्तवन्तौ[१५] तथा च कन्यकां स्नेहावशादल±ारैः विभूषयित्वा कन्यायाः पालनं कृतवन्तौ।[१६] 'समराइच्चकहा' इत्यस्यानुसारं तदानीं स्त्री शिक्षा आवश्यकी आसीत्। पुत्र्याः रत्नवत्याः शिक्षणाय तस्याः पितरौ नैकानि साधनानि एकत्रीकृतवन्तौ। स्वपुत्रीं संगीतादिविषयेषु विज्ञानेषु निष्णातं कृतवन्तौ।[१७] कुसुमावली बाल्यकालादेव काव्यस्य चित्रकलायाÁ शिक्षा प्रदत्ताऽऽसीत्।

शिक्षायां बलत्वात् काश्चन् कन्यकाः विद्यावन्त्यः बभूवुः, ताः अध्यापनकार्यमपि कुशलतापूर्वकम् अकुर्वन्। कुवलयमालाकथानुसारं भरुकच्छस्य कन्या मदनमञ्जरी स्वस्य पितुराज्ञया एकं राजगीरं अल्पसमये एव अक्षरज्ञानं, लिपिज्ञानं, नृत्यज्ञानं दर्शनादीनाञ्च शिक्षां प्रदाय प्रबोधितयती।[१८] एवम्प्रकारेण प्राकृतकथासाहित्ये अनेकेषु स्थलेषु कन्यायाः पुत्र्याः वा महत्त्वं प्रकाशितमस्ति।

पत्नी -

सुशिक्षिताः, सस्कारयुक्ताः साहसवती कन्या यदा वरेण सह विवाहसम्बन्धे संयोजिताः आसन् तदा ताः वध्वः, भार्याः, पत्नयः, जायाः, गेहिन्याः, वनिताः आदिपदैः सम्बोधिताः बभूवुः। जैनसंस्कृतौ दारायाः भूमिका

१२. वरा[३] चरितमहाकाव्य, आचार्य जटासिंहनंदी, ३१/१,७

१३. जैन आगम साहित्य में भारतीय समाज, जगदीशचन्द्र जैन, पृष्ठ-२४५, २८५

१४. समराइच्चकहा एक सांस्कृतिक अध्ययन, यादव झिनक, पृष्ठ- १२१-१४१

१५. हरिभद्र के कथा साहित्य का आलोचनात्मक परिशीलन, शास्त्री नेमिचन्द्र, पृष्ठ-३७७

१६. कुवलयमालाकहा का सांस्कृतिक अध्ययन, प्रेमसुमन जैन, पृ० ११९

१७. समराइच्चकहा, हरिभद्रसूरी, भव-८, पृष्ठ-७४४

१८. समराइच्यकहा, हरिभद्रसूरी, भव-८, पृष्ठ- ७४४

सहचरीरूपे आसीत्। ताः स्व-स्वपतिना स मित्ररूपे, सलाहकाररूपे संरक्षिकारूपे च प्रतिष्ठिताः आसन्। पत्तिभिस्सह मनवचनवाग्भ्यः निवासः स्त्रीणां कर्तव्यमासीत्। ''ससराइच्चकहा'' इत्यनुसारं सार्थवाहैस्सह तेषा पत्न्यः अपि नैकं कष्टं सहित्वा यात्रायां तैस्सह गच्छन्ति स्म।

अस्मिन् युगे नारीणां महत्त्वमस्मादेव प्रकटीभवति यत् ताः भ्रमणाय धार्मिकोत्सवेषु वा गमनाय स्वतन्त्राः आसन्। गुणवतीं पत्नीं लब्ध्वा पतिः स्वं कृतार्थमवबोधयति स्म। पत्नीतः पतिः सुशोभितः बभूव। पत्नी पतिं सुपथीकरोति स्म्। अस्मिन् विषये मन्दोदरी स्वां शान्तप्रकृतितः, दूरदर्शितातः विवेकशीलतातÁ ससमयः हितोपदिशति स्म। स्वान्तर[3] तेजात् रावणमवबोधयन् कथयति स्म- हे महाशय! विषयसुखं अल्पसुखदायी बहुदुःखकरञ्चास्ति, इदं परित्याजनीयमस्ति अतः परदारायाः इच्छां त्यक्त्वा सुखमाप्नोतु। भवता सहस्रराज्ञीभ्यः तृप्तिनैव लब्धा तर्हि एकातः कथं भविष्यति? अतः इदं स्पष्टरूपेण कथयितुं शक्यते यत् तत्कालीने समाजे पत्नी रूपे स्त्रीणां यत्स्वरूपमासीत् तन्न केवलं महत्त्वमपितु तस्याः शीलं, सदाचरणं कर्तव्यपरायणताञ्चापि प्रदर्शयति।[१९] जैनसंस्कृतमहाकाव्येषु अपि आदर्शपत्नीनां नैकान्युदाहरणान्युपलब्धानि भवन्ति। पतिपत्न्योः मध्ये सौहार्दपूर्णं वातावरणं पारस्परिकानुरागा¨ादि भावनावैशिष्ट्यमादर्शजीवनस्य मूलाधारं स्वीक्रियते विद्वद्भिः।[२०] वरा[3] चरितमाहा-काव्ये राजा वरा[3] : तस्य चानेकयोः पत्न्योर्मध्ये मधुरसम्बन्धः आसीत्।[२१] अन्यच्चानेकेषु स्थलेषु ईदृशान्युदाहरणानि दरीदृश्यन्ते यानि दाम्पत्यजीनस्य कृते अनुकरणीयानि सन्ति। सङ्क्षेपेण कथितुम् शक्यते यत् दाम्पत्यजीवनं सुखमयकरणाय नार्याः पत्नीरूपस्य विशिष्टा भूमिका आसीदिति। सच्चरित्रदारान् सुधाहारतुल्या, विशुद्धशीला, धर्मकल्पवृक्षादिः सम्मानसूचकानि विशेषणानि प्रदत्तानि सन्ति।[२२]

माता -

मातृरूपे नार्याः प्राचीनकालादेव महत्त्वपूर्णं स्थानं वर्तते। मातरं समाजे गुरोः पितुः अधिकतरं स्थानं सम्प्राप्तमासीत्। नैकासु प्राकृतकथासु संस्कृतमहाकाव्येषु च पुत्रवात्सल्यप्रेम्णः मार्मिकं चित्रणमभूत्। कविना उद्योतनसूरिणा मातृपुत्रयोः —ेहस्य सजीवं चित्रणं प्रस्तुतम्। यदा मायावी अश्वः कुवलयचन्द्रं हृतं तर्हि तस्य माता प्रिय[3] : मूर्छिता बभूव। तस्याः दशा उन्मत्तमिव आसीत्। वरा[3] चरिते पुत्रस्य वरा[3] स्य अपहरणस्य सूचनां श्रुत्वा तस्य माता गुणदेवी शोकसंतप्तं भूत्वा मूर्च्छितवती। मात्रे पुत्रवियोगस्य दुःखमत्यधिकमसह्यं भवति। यथा-

तवागतात्र या पीडा सा मे किं न भविष्यति।
वरं मे मरणे वत्स जीवितं किं त्वया विना ।।[२३]
किं जीवितेन मम पुत्र विना त्वयाद्य किं राज्यकोशहरिसमाजसद्गुणेन[२४]

प्राकृतसाहित्ये 'पउमचरिय' ग्रन्थे मातृरूपे नार्याः हृदयविदारकं मार्मिकञ्च महत्त्वं प्रकटितमस्ति। माता सीता गर्भवती भूत्वापि गर्भहत्यां नैव कल्यते। प्रतिकूलस्थितिष्वपि न केवलं युगलपुत्रं अजनयत् अपितु तौ

१९. पउमचरियं, आचार्य विमलसूरी
२०. वरा[3] चरितमहाकाव्य, आचार्य जटासिंहनंदी २/९०-९३
२१. वरा[3] चरितमहाकाव्य, आचार्य जटासिंहनंदी, २/९०-९३
२२. पउमचरियं, आचार्य विमलसूरी
२३. समराइच्चकहा, हरिभद्रसूरी क्रमशः भव ९-पृष्ठ ९२२ भव ८ पृष्ठ ७३१ भव २-पृष्ठ १२३१
२४. वरा[3] चरितमहाकाव्य आचार्य कटासिंहनंदी १५/२६

उचितसंस्कारं दत्त्वा, वंशे सम्मेलयित्वा, तयोः उत्तराधिकारं समर्प्य मातृत्वगौरवं सम्प्राप्तम्। अस्यामेव उमचरिय अन्यदेकं नारीपात्रमस्ति यया स्वां दुराचारिणीं घोषयित्वा, Âशुरगृहात् पितृगृहाच्च निष्काषितं भूत्वा अपि सम्पूर्णजगत् ईदृशं पुत्ररत्नं प्रदत्तं येन जगतः राक्षसत्वं विनश्य रामत्वं प्रतिष्ठापितम्। तच्चरित्रमस्ति सती अञ्जनायाः। एवमप्रकारेण अन्येषु स्थलेषु जैनसंस्कृतौ नार्याः महत्त्वं प्रकाशनमभूत् यस्योल्लेखः नैव क्रियते विस्तारभयात्।

अन्ते कथितुमिच्छामि यत् जैनसंस्कृतौ नार्याः या निन्दा उल्लेखिता अस्ति, सा नास्ति नार्याः निन्दा अपितु तस्या अशुभकर्मणामस्ति। जैनसंस्कृतेः स्पष्टोद्घोषः यत् सर्वे आत्मानः समानासन्ति, पुरुषस्य वा भवेत् उत वा नारीणाम्। तयोः अन्तरं तेषां कर्माधारितं भवति। गुणानां पूजा पूर्वेऽस्मिन् कालेऽपि अभूत्, वर्तमानेऽपि भवन् अस्ति। तथा–

गुणाः पूजास्थानं गुणिषु न च लि[३] न च वयः।
गुणज्ञता जगत्पूज्या गुणी सर्वत्र मन्यते ।।[२५]

अवगुणानां निन्दा पूर्वेऽस्मिन् काले अपि अभूत् वर्तमाने चापि भवति। एतदर्थं जैनसंस्कृतौ गुणाः पूजनीयाः नैव व्यक्तिविशेषः।

उक्तमपि –

मोक्षमार्गस्य नेतारं भेत्तारं कर्मभूभृताम्।
ज्ञातारं विश्वतत्त्वानां वन्दे तद् गुणलब्ध्ये ।[२६]

–आचार्यः (जैनदर्शनविभागः)
श्रीलालबहादुरशास्त्रीकेन्द्रीयसंस्कृतविश्वविद्यालयः
कटवारिया सरायः, नवदेहली–१६

२५. उत्तररामचरितम्, चतुर्थ अ± श्लोक-१
२६. तत्त्वार्थसूत्रम्, म[३]लाचरणम्

प्रियमानसचलच्चित्रेऽभिनयस्य नाट्यशास्त्रीयो विमर्शः

-प्राची शर्मा

शोधसारः

प्रियमानसम् इत्येकं संस्कृतचलच्चित्रं वर्तते, यस्य सार्वजनिकं प्रकाशनं २०१५तमे ख्रिष्टीये जातम्। विश्वस्य तृतीयं संस्कृतचलच्चित्रम् एतत् बेबी मैथ्यू सोमतीरम् प्रोडक्शन् हाउस इत्यनेन निर्मितम्। चलच्चित्रस्य एतस्य निर्देशकः विनोदम±रा वर्तते। एतत् चलचित्रं २०१६तमे ईस्वीये राष्ट्रियफिल्मपुरस्कारं प्राप्तवान्।

चलच्चित्रविधाऽपि नाटक-प्रकरण-भाणादिनाट्यशास्त्रीयविधावदेव दृश्य-श्रव्यमाध्यमं मनोरञ्जनस्येति। भरतमुनिना नाट्यविषये '.....क्रीडनीयकमिच्छामे दृश्यं श्रव्यं च...।'[१] इत्युक्तं, तदेव वैशिष्ट्यं भवितुमर्हति आधुनिकचलच्चित्राणाम्, अतः भरतमुनेः नैकाः नाट्यावधारणा आधुनिकचलच्चित्रेषु दृग्गोचरा बोभुवति। पञ्चमो वेदः इति सञ्ज्ञया सुविदितं, भरतमुनिना विरचितं ***नाट्यशास्त्रं*** नाटकस्य स३ीतस्य अन्यासां च ललितकलानां विश्वकोषम् अस्ति।

काव्यम् उभयथा वर्तते-***दृश्यं श्रव्यं च।***[२] नेत्रविषयकत्वाद् एतद् दृश्यम् उच्यते। अभिनेतुं योग्यत्वाद् अभिनयः।[३] अभिनयविषयाणां स±लनं वेदादेव स्वीकृतम्।[४] मुनिना भरतेण स्वकीये ग्रन्थे नाट्यशास्त्रे अभिनयस्य चतुर्विधत्वं निर्दिष्टम्-आ३कं वाचिकम् आहार्यं सात्विकं च।[५] नन्दिकेश्वरानुसारं समस्तमपि जगत् चतुर्विधाभिनयस्वरूपस्य शिवस्य आनन्दरूपं वर्तते।[६] आ३कम् इति शरीरचेष्टासम्बन्धिनि कश्चिद् अभिनयः। वाणी एवं वाचिकम्। पात्राणामवस्था वेशविन्यासं च आहार्यम्। सात्त्विकभावैः पुष्टः अभिनयः सात्त्विकः कथ्यते। एतदतिरिच्य सामान्याभिनयः चित्राभिनयÂति अभिनयद्वयस्य चर्चाऽपि भरतमुनिना कृता। सामान्याभिनयः चतुर्ण्णामेव अभिनयप्रकाराणां समाविष्टम् आनुपातिकं च रूपम् अस्ति। प्रकृतं शोधपत्रं प्रियमानसम् इति चलच्चित्रस्य नाट्यशास्त्राधृतां मीमांसां प्रस्तोतुं कÁत् प्रयत्नः।

प्रमुखशब्दाः -प्रियमानसम्, चलच्चित्रम्, अभिनयः, आ३कम्, वाचिकम, आहार्यम्, सात्विकम्, उण्णायि वारियर्।

मुख्यविषयः

प्रियमानसम् इति चलच्चित्रम् सप्तदश-शताब्दे: केरलदेशीयस्य कवेः उण्णायिवारियार् इत्यस्य जीवनाधारितम् अस्ति। चलच्चित्रेऽस्मिन् कवेः काव्यकर्मणि आगतानां काठिन्यानां वृत्तमस्ति। उण्णायिवारियार् स्वकीयां प्रसिद्धाम् अट्टकथां ***नलचरितम्*** इतीमां रचयन्नस्ति तथा तत्रैव कथापात्रैः सह संवादमपि कुर्वन्निव वर्तते।

---

१. नाट्यशास्त्र (आर.एस.नागर) १.११
२. साहित्यदर्पण ६.१
३. नाट्यदर्पण सूत्र १.१ पृष्ट १२ (व्याख्या)
४. नाट्यशास्त्र १.१७
५. नाट्यशास्त्र ६.२४
६. अभिनयदर्पण श्लोक १

एतस्मिन् चलच्चित्रे मुख्यतः संस्कृतं यत्र-तत्र च मळयाळम् भाषा प्रयुक्ता। एषः प्रयोगः संस्कृतनाटकानां सदृशमेव एतत् चलच्चित्रं मणिप्रवालस्वरूपं विदधाति। प्राप्तानां संस्कृतनाटकानां परम्परा विशुद्धा संस्कृतनाट्यपरम्परा नास्ति, यतो हि तेषु संस्कृतेन सह प्राकृतस्यापि विविधस्वरूपाणि समाविष्टाः दृश्यन्ते।

चलच्चित्रे कवेः उण्णायिवारियार् इत्यस्य आधिकारिककथया सह नलदमयन्तीकथाऽपि सहचारिरूपेण नियोजिता। अत्र वैशिष्ट्यमस्ति यत् नलदमयन्तीकथा कथकलीमाध्यमेन प्रदर्शिता वर्तते। चलच्चित्रस्य कथा त्रिषु विभागेषु विभाजयितुं शक्यते-***प्रथमः*** -कवेः राजकविरूपिजीवनम्, ***द्वितीयः*** -यदा मालाबन्धनेन जीवनं यापयति कविः, तत्प्रकारकं कवेः यौवनम्, ***तृतीयः***, नलचरितम् इत्यस्य पात्रैः सह कवेः संवादः।

चलच्चित्रस्य कथानकम्-कथावस्तु त्रिभिर्प्रकारैः स्वीक्रियते प्रख्यातः, उत्पाद्यः मिश्रश्च।[७] एतच्चलच्चित्रं मिश्रप्रकारकेण कथावस्तुना युक्तम्। मिश्रप्रकारकायाम् अभिव्यक्तौ सुविख्याततया सह कवेः कल्पनाया अपि समावेशी दृश्यते। प्रकृतचलच्चित्रं मलयालम्-साहित्यस्य सुप्रसिद्धकवेः। उण्णायिवारियर् इत्यस्य जीवनवृते आधृतं, कविकृतेÁ कथकलीनृत्यशैलीमाध्यमेन प्रस्तुतीकरणं चलच्चित्रकारस्य स्वकल्पना स्वशैली वा अस्ति। एतेनैव मिश्रप्रकारकमिदं चलच्चित्रम्।

चलच्चित्रे धर्मिता- चलच्चित्रे कवेः। उण्णायिवारियर् इत्यस्य मनस्स्थितिः लोकविरूपे प्रस्तुता, यः लोकधर्मम् अभिव्यञ्जयति, एवं च कविना सह पात्राणां संवादः नाट्यप्रधर्मितायाः उदाहरणम् अस्ति। चलच्चित्रस्य पात्राणां मध्ये परस्परं गद्यात्मकसंवादाः लोकधर्मितया प्रस्तुताः तथा नलचरितम् इति कथानकस्य पात्राणाम् अभिव्यक्तिः मुख्यतया आ३काभिनयेन सामान्याभिनयेन च प्रदर्शिता। लोकनृत्यस्य शास्त्रीयनृत्यस्य च समायोजनमपि क्रमशः लोकस्य नाटयधर्मितायाश्च उदाहरणम् अस्ति।

चलच्चित्रे अभिनयप्रयोगाः

आ३काभिनये नाटकीयस्य अर्थस्य उपस्थापनायै शरीरस्य अ३ोपा३नि प्रत्य३नि च हेतुभूतानि सन्ति।[८] भरतमुनेः अनुसारम् आ३काभिनयः त्रिविधो भवति- शरीरजो मुखजः चेष्टाकृतश्च।[९] चलच्चित्रस्य प-चमे (५) दृश्ये (चित्रम् १) उण्णायिकविना दमयन्ती स्वयौवनसम्बन्धिनं काव्यं श्रुत्वा निमीलिताक्षा मुखजभावैः लज्जां प्रदर्शयती अस्ति।[१०]



चित्रम् १

७. दशरूपक १.१५
८. नाट्यदर्पण वृत्ति ३.२२७
९. नाट्यशास्त्र ८.११
१०. १. दृश्य ५ प्रियमानसम् चलच्चित्रे।
२. पृष्ठ २३ प्रियमानसम् पटकथायाम्।

चलच्चित्रस्य प्रारम्भे विहगानां कूजनं, पार्श्वे कर्णाटकस[3]ीते श्रवणे सति विशालम् इति नाम्नी स्त्रीपात्रं जलेन तुलसीसेकं कुर्वती अस्ति। एतदनन्तरं तुलसीदीपपूजां जलार्पणं च कुर्वती सा वारंवारं कवेः उण्णायिवारियार् इत्यस्य कविताया: स्वरं प्रति अभिमुखा दृश्यते। चित्रम् २ इत्यत्र श्रवणाय नायिकया कर्णौ कविस्वरं प्रति प्रदतौ। नाट्यशास्त्रपरम्परायाम् एषा क्रिया त्रिपताकामुद्रया प्रदर्श्यते परन्तु चलच्चित्रे तत्प्रयोगः न प्राप्यत एव। तुलसीपूजनसमये अभिवादने अञ्जलिमुद्रायाः, पुष्पार्पणकाले मुकुलमुद्रायाः जलार्पणे च पताकामुद्रायाः प्रयोगाः कृताः, एवमत्र अञ्जलि-मुकुल-पताकादीनां हस्तमुद्राणामपि सम्पादनं कृतमस्ति।

पताका मुकुलं च असंयुते हस्तमुद्रे स्तः, तथा अञ्जलिः संयुता हस्तमुद्रा। एतदतिरिच्य चतुरः, भ्रमरः, हंसास्यं, मृगशीर्षम् इत्यादीनां हस्तमुद्राणां प्रयोगः चलच्चित्रे अनेकत्र दृश्यमानः अस्ति।



चित्रम् २ (श्रवणमुद्रायाम्)



चित्रम् ३ (सेचनक्रिया)



चित्रम् ४ (पताकामुद्रा)



चित्रम् ५(मुकुलमुद्रा)



चित्रम् ६ (अञ्जलिमुद्रा)

वाक् सर्वस्यापि मानवव्यापारस्य प्राणभूता अस्ति।[११] वागेव वाचिकाभिनयः। अस्मिन् अभिनये शब्दच्छन्द-लक्षण-गुण-दोष-अलंकार-पाठ्यादयो विषयाः समाविशन्ति। चलच्चित्रेऽस्मिन् गद्यपद्ययोः मिश्ररूपं प्राप्यते। बहुशः कल्याणीच्छन्दसः प्रयोगः दृश्यते। नाट्यशास्त्रे रसभावयोः अधिकृत्य वाचिकाभिनयस्य द्वादशप्रभेदाः उक्ताः, तेषु केचन द्रष्टव्याः -चलच्चित्रस्य दृश्ययोः ४ तथा ६ इत्यत्र राजमातुः सखिभिः सह वार्ता ***आलापस्य*** उदाहरणम् अस्ति।[१२] दृश्ये ८ इत्यत्र नम्यार 'कातिलोला' संवादः ***प्रलापस्य*** उदाहरणम्।[१३] दृश्ये १७ इत्यत्र विशालम् इत्यस्याः कथनं 'मां भवतः दमयन्त्याः स्थाने प्रतिष्ठितुं शक्नोति किम् इति दुःखावस्थायाम् उक्तत्वाद् ***विलापः*** अस्ति। 'कुण्डिन... नायक....' इति पद्यस्य पुनःपुनरुच्चारणम् ***अनुलापः।***[१५] उण्णायि इत्यस्य नम्यार् इत्यनेन सह संवादः काव्यकर्मणि उक्ति-प्रयुक्तित्वात् ***संलापः*** अस्ति।[१६] एवमेव अपलापः[१७], सन्देशः[१८], अतिदेशः,[१९] निर्देशः[२०], उपदेशः[२१], व्यपदेशः[२२] तथा अपदेशः[२३]इत्येतेषां प्रयोगा अपि चलच्चित्रे बहुत्र प्राप्यन्ते।

चलच्चित्रे सम्बोधनप्रयोगाः -

रानीं प्रति-हे राज्ञिमातः, हे मातः।

नृपं प्रति-हे अन्नदाता, हे प्रभो।

कविं प्रति- महोदय, हे कवे, हे नाथ, प्रियमानसम्।

हंसं प्रति - हे खगराजन्।

दमयन्तीं प्रति- प्रियमानसि, हे सखि।

सामान्यसम्बोधनम् - रामः खलु, हे प्रियमानस, हे प्रियतम, हे प्रिय, भवति, भवान्, मातः।

नाट्याभिव्यक्त्यनुगुणं संवादः त्रिप्रकारको भवति सर्वश्राव्यम्, अश्राव्यं नियतश्राव्यं च।[२४] यत्तु सर्वैरपि पात्रैः श्राव्यम् अथवा यस्मिन् संवादे किमपि न अन्तर्हितं, तत् ***सर्वश्राव्यम्*** उच्यते, यथा 'राजा-आट्टकथा कियत्पर्यन्तमभवत्? श्रवणार्थम् उत्सुकोहम्... आ। दर्शनमपि। उण्णायि - हे प्रभो.... आरम्भं कृतवान्। परन्तु पुरतो वेगेन न चलति।''[२५] स्वगतसंवादः ***अश्राव्यं*** भवति। चलच्चित्रे उण्णायिः स्वकथायाः पात्रैः सह संवादं कुर्वन्



चित्रम् ७

उण्णायिः बाहुकपात्रेण सह संवादं कुर्वन्।

११. नाट्यशास्त्रम् १४.३
१२. नाट्यशास्त्रम् २२.५४
१३. नाट्यशास्त्रम् २२.५४
१४. नाट्यशास्त्रम् २२.५५
१५. नाट्यशास्त्रम् २२.५५
१६. नाट्यशास्त्रम् २२.५५
१७. नाट्यशास्त्रम् २२.५६
१८. नाट्यशास्त्रम् २२.५७
१९. नाट्यशास्त्रम् २२.५७
२०. नाट्यशास्त्रम् २२.५८
२१. नाट्यशास्त्रम् २२.५९
२२. नाट्यशास्त्रम् २२.५८
२३. नाट्यशास्त्रम् २२.५९
२४. दशरूपकम् १.६४
२५. १. दृश्य १२, प्रियमानसम् चलच्चित्रे।
२. पृष्ठ ३४, प्रियमानसम् पटकथायाम्।

दृश्यते किन्तु पात्राणाम् उपस्थित्या तत्र प्रतीयते यत् सः प्रत्यक्षसंवादे संलग्नः, चलचित्रस्य व्यापकव्यवस्थायाम् एषा प्रस्तुतिः अश्राव्यप्रयोगसन्दर्भे काञ्चित् नूतनता विदधाति। उण्णायिकवेः पात्राणि आ३कमुद्राभिः परस्परं संलपन्ते, दर्शकेभ्यः तेषां वार्तायाः बोधसौकर्याय आकाशभाषितविधेः प्रयोगः कृतः।



चित्रम् ८ उण्णायिः हंसपात्रेण सह संवादं कुर्वन्।

अभिनये सात्त्विकभावानां चरमोत्कर्षेण अभिव्यक्तिरेव सात्त्विकोऽभिनयः।[२६] अष्ट सात्त्विकभावाः विद्यन्ते[२७]– स्तम्भ–स्वेद–रोमाञ्च–स्वरभ३–वेपथु–वैवर्ण्य–अश्रु–प्रलयाः इति। चलच्चित्रदृश्ये १९ इत्यत्र उण्णायिः विशालम् इत्यस्याः नृत्यं दृष्ट्वा कामभावेन स्तब्धोऽभूत, इत्यत्र स्तब्धत्वं शून्यता वा ***स्तम्भं*** द्योतयति।[२८] दृश्ये ३६ इत्यत्र विशालम् स्वस्नेहस्य प्रत्युत्तरं स्नेहं न प्राप्तवती, स्वप्रियस्य परुषवचनान्यपि श्रुत्वा सा भग्नहृदया सञ्जाता, अश्रुवेगश्चापि तस्याः भवति, एष एव ***अश्रु*** इति सात्विकभावः।[२९] दृश्ये २६ इत्यत्रापि त±म् स्वदुःखस्याभिव्यक्तिः रोदनेन करोति।[३०] एतद् ***अश्रुवेगस्य स्वरभंगतायाश्च*** उदाहरणम् अस्ति।



चित्रम् ९ दृश्ये १९ इत्यत्र उण्णायिः।

२६. नाट्यशास्त्रम् २२.१
२७. नाट्यशास्त्रम् ६.२३
२८. नाट्यशास्त्रम् १. दृश्य १९ प्रियमानसम् चलच्चित्रे
२. पृष्ठ ४३ प्रियमानसम् पटकथा।
२९. १. दृश्य ३६ प्रियमानसम् चलच्चित्रे
२. पृष्ठ ६९ प्रियमानसम् पटकथायाम्
३४. १. दृश्य २६ प्रियमानसम् चलच्चित्रे
२. पृष्ठ ५४ प्रियमानसम् पटकथायाम्।

मञ्चीयव्यवस्थायाः अपेक्षया चलच्चित्रेषु आहार्यस्य पर्याप्तावकाशः प्राप्यते। अस्मिन् चलच्चित्रे सज्जायाः स्वरूपं तात्कालिकपरिदृश्यानुगुणमेव विधत्तम्। नाट्यशास्त्रे चतुर्विधं नेपथ्यविधानं निर्दिष्टम्-पुस्तः, अल±ारः, अ३रचना सज्जीवञ्च।[३१] पुस्त इत्यत्र चलच्चित्रस्य पृष्ठभूमिः अवगन्तुं शक्यते। अत्र तिरुविताकूरप्रासादस्य अन्तः बहिर्भागं, नदीतीरम्, देवालयपरिसरः (अन्तः बर्हि च), उण्णाय्येः प्रकोष्ठः, स३ीतमण्डपं, प्रासादस्य ब्रह्मस्थानं, समुद्रतीरम्, ग्रामे वापी, पाकशाला इत्यादीनां स्थलानां प्रयोगः र३मण्डपरूपे कृतः। एवं च कटं, शय्या, आसनम् इत्यादीनि पुस्तवस्तूनि सन्ति। उण्णायिः, नृपः, विशालम् इत्यादीनां पात्राणां वेशविन्यासं सप्तदशशताब्देः अनुरूपम् उपस्थापितम्, एषोऽलङ्कारान्तर्गतविषयः। एतदतिरिच्य अ।कथायाः पात्राणाम् आहरणं कथकलीनृत्यशैल्यां कृतम्। अङ्गरचनाया अन्तर्गताः सरस्वती कलिश्च उल्लेखनीयाः। सज्जीव इत्यस्यान्तर्गतं चलच्चित्रेषु कृत्रिमविधीनां प्रयोगः क्रियते किन्तु प्रकृते चलच्चित्रे साक्षात् एवं विधप्रयोगः न प्राप्यते।

पात्राणां वेशविन्यासम्



चित्रम् १० नृपः



चित्रम् ११ राज्ञी विशालं च



चित्रम् १२ उण्णायिः स्वकथापात्रैः सह

उपसंहारः

चलच्चित्रविधायां प्रियमानसम् कर्Ãन्नवीना सशक्ता च अभिव्यक्तिः। अस्मिन् चलि¦त्रे नाट्यसम्मत-प्रयोगाणाम् अनेकस्वरूपाणि प्रयुक्तानि। चलच्चित्रे केषुचित् स्थलेषु साक्षात् क्वचि¦ा किं¨त् परिवर्तनेन सह नाट्यस्य अ३ोपा३ानां प्रयोगः कृतः। चलच्चित्रप्रयोगस्य मर्यादा नाट्यप्रयोगाद् विस्तृता व्यापका च भवति, अतः स्वाभाविकी एव भिन्नता तथापि नाट्यसम्मतप्रयोगाणाम् अन्वेषणेन ज्ञायते यत् नैकाः विभिन्नताः सत्स्वपि एतस्य मूले नाट्यतत्त्वमेव विद्यमानम् अस्ति।

सहायकग्रन्थसूची

१. प्रियमानसम् – चलच्चित्रम्, म±र, विनोद, बेबी मैथ्यू सोमतीर्थम्, २०१५.
२. भरत, नाट्यशास्त्र, सम्पा., नागर, आर.एस, परिमल पब्लिकेशन दिल्ली, २०१२।
३. संस्कृतनाट्यः, अभिनय एवं पटकथा लेखन, द्विवेदी, डॉ० मीरा, परिमल प्रकाशन, दिल्ली, २०१८.
४. धनञ्जय, दशरूपक, व्या. शास्त्री, श्रीनिवास, साहित्य भण्डार, मेरठ, १९८३।
५. विश्वनाथ, साहित्यदर्पण, व्या.विद्यालंकार, निरूपण, साहित्य भण्डार, मेरठ, २००४।
६. Unnayi Varier, Nalacaritam with performance manual based on kalamandalam Krishnan Nair's stage version, trans. Gopalakrishnan, Sudha, Sahitya Akademi, 2014.

–पी.एच.डी., (विद्यावारिधि)
दिल्ली विश्वविद्यालयः
देहली–०७

श्रेष्ठसौन्दर्य-शिल्पी कालिदासः

-डॉ. कैलाशनाथः द्विवेदी

